श्री शिवरामाष्टकं

श्री शिवरामाष्टकं

शिव हरे शिवरामसखे प्रभो
त्रिविधतापनिवारण हे विभो |
अजजनेश्वरयादव पाहि मां
शिव हरे विजयं कुरु मे वरं || 1 ||

कमललोचन राम दयानिधे
हर गुरो गजरक्षक गोपते |
शिवतनो भवशंकर पाहि मां
शिव हरे विजयं कुरु मे वरं || 2 ||

सुजनरंजनमंगलमंदिरं
भजति ते पुरुषः परमं पदं |
भवति तस्य सुखं परमाद्भुतं
शिव हरे विजयं कुरु मे वरं || 3 ||

जय युधिष्ठिरवल्लभ भूपते
जय जयार्जित पुण्यपयोनिधे |
जय कृपामय कृष्ण नमोऽस्तु ते
शिव हरे विजयं कुरु मे वरं || 4 ||

भवविमोचन माधव मापते
सुकविमानसहंस शिवारते |
जनकजारत राघव रक्ष मां
शिव हरे विजयं कुरु मे वरं || 5 ||

अवनिमंडलमंगळ मापते
जलदसुंदर राम रमापते |
निगमकीर्तिगुणार्णव गोपते
शिव हरे विजयं कुरु मे वरं || 6 ||

पतितपावन नाममयी लता
तव यशो विमलं परिगीयते |
तदपि माधव मां किमुपेक्षसे
शिव हरे विजयं कुरु मे वरं || 7 ||

अमरतापरदेव रमापते
विजयतस्तव नामधनोपमा |
मयि कथं करुणार्णव जायते
शिव हरे विजयं कुरु मे वरं || 8 ||

हनुमतः प्रियचापकर प्रभो
सुरसरिद्धृतशेखर हे गुरो |
मम विभो किमु विस्मरणं कृतं
शिव हरे विजयं कुरु मे वरं || 9 ||

अहरहर्जन रंजनसुंदरं
पठति यः शिवरामकृतस्तवं |
विशति रामरमाचरणांबुजे
शिव हरे विजयं कुरु मे वरं || 10 ||

प्रातरुत्थाय यो भक्त्या पठेदेकाग्रमानसः |
विजयो जायते तस्य विष्णुमाराध्यमाप्नुयात् || 11 ||

इति श्रीरामानंदविरचितं श्रीशिवरामस्तोत्रं |